हर हर शङ्कर ॐ जय जय शङ्कर

     

श्री-वेदव्यासाय नमः

# श्रीमद्-आद्य-शङ्कर-भगवत्पाद-परम्परागत-मूलाम्नाय-सर्वज्ञ-पीठम्
# श्री-काञ्ची-कामकोटि-पीठम्
# जगद्गुरु-श्री-शङ्कराचार्य-स्वामि-श्रीमठ-संस्थानम्

## गो-पूजा



As per the saying **गावो विश्वस्य मातरः**, cows have the status of mothers because they give milk to all humans, like mothers.

The Veda says "Cows naturally produce milk not only for their calves but humans also". The Veda also praises and prays saying "O cows! You make the weakened well-nourished. You make the unclean clean. Elders praise you. Make our homes auspicious by your voices!" It also says "Cow is everyone's friend".

Cow and Tulasi should definitely be in a home. If both of these are present, Lakshmi Herself will reside. The shastra says that all devatas live


9884655618 8072613857 vdspsabha@gmail.com vdspsabha.org

in the body of a cow.

Due to times and situations, not everyone is able to do Go Samrakshanam at home today. To keep this in mind, one may at least place a vigraha or picture of a cow with calf in the home puja.

Our ancestors have very much praised the simple dharma of giving a handful of grass to cows as it is said in the Tirumandiram "yāvarkkumām pasuvukku oru vāyurai". On occasions such as our birthdays, why whenever we can, let us go to the nearby goshala, and buy and give grass and agasti (Tam: agatti, Tel: avisa, Kan: agase) leaves etc and thereby attain punya!

Pongal is the festival of worshipping Surya and expressing gratitude for the harvest. Along with this, we worship cows and bulls which are inseparable from agriculture. Our tradition is to change their old ropes, bathe them, apply turmeric, anoint with tilaka, and do puja.

One can do Go Puja on Fridays or whenever one wishes. One should do Go Danam only after doing puja to the cow. Go Puja is done daily in mathams and temples.

To do such a special Go Puja, in this document we give first a laghu paddhati and then a more detailed paddhati as presented from page 398, Go Seva Ank, Kalyan Patrika, Gita Press, "Go"-rakh-pur, 1995. The verses from puranas etc. as source for the above are given from Godana Prakarana of Samskara Dipaka by Shri Nityananda Pant part 3 (Chaukhamba, Kashi, 1951) and Vishnudharmottara Purana book (Kashi Mumukshu Bhavan collection, publication details not known). Our gratitude is due to all the sajjana-s who published such sadvishaya-s.

We request all to do Go Puja as per their ability and receive the benevolence of Go Mata and Acharyas.

# ॥ प्रधान-पूजा ॥

(आचम्य)
[विघ्नेश्वरपूजां कृत्वा।]

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये॥

प्राणान् आयम्य। (अप उपस्पृश्य, पुष्पाक्षतान् गृहीत्वा)

ममोपात्त-समस्त-दुरित-क्षय-द्वारा श्रीपरमेश्वरप्रीत्यर्थं शुभे शोभने मुहूर्ते अद्य ब्रह्मणः द्वितीय-परार्धे श्वेतवराह-कल्पे वैवस्वत-मन्वन्तरे अष्टाविंशतितमे कलियुगे प्रथमे पादे जम्बू-द्वीपे भारत-वर्षे भरतखण्डे मेरोः दक्षिणे पार्श्वे अस्मिन् वर्तमाने व्यावहारिकाणां प्रभवादीनां षष्ट्याः संवत्सराणां मध्ये
२०२६-Jan-१५ (THU) / ५१२७-मकरः-२ (गुरुः) - दृग्गणितानुसारेण
**विश्वावसु**-नाम-संवत्सरे **उत्तरायणे हेमन्त**-ऋतौ **मकर-पौष**-मासे **कृष्ण**-पक्षे **द्वादश्यां** शुभतिथौ **गुरु**वासरयुक्तायां **ज्येष्ठा**-नक्षत्रयुक्तायां **वृद्धि**-योगयुक्तायां **कौलव**-करण (०७:०७; **तैतिल**-करण)युक्तायाम् एवं-गुण-विशेषण-विशिष्टायाम् अस्यां **द्वादश्यां**
२०२६-Jan-१६ (FRI) / ५१२७-मकरः-२ (भृगुः) - वाक्यगणितानुसारेण
**विश्वावसु**-नाम-संवत्सरे **उत्तरायणे हेमन्त**-ऋतौ **मकर-पौष**-मासे **कृष्ण**-पक्षे **त्रयोदश्यां** शुभतिथौ **भृगु**वासरयुक्तायां **मूल**-नक्षत्रयुक्तायां **ध्रुव**-योगयुक्तायां **गरजा**-करण (१०:०९; **वणिजा**-करण)युक्तायाम् एवं-गुण-विशेषण-विशिष्टायाम् अस्यां **त्रयोदश्यां**
शुभतिथौ श्रीपरमेश्वरप्रीत्यर्थम्

- अस्मिन् भारत-देशे गो-सम्पदः विशेषतः भारतीय-गो-जातीनाम् अभिवृद्ध्यर्थम्
- जनानां गो-विषये श्रद्धा-भक्ति-प्राप्त्यर्थम्
- गो-वध-निवृत्त्यर्थं तद्-विरुद्ध-शासन-नियम-सिद्ध्यर्थम्
- गवाम् अन्येषां च चतुष्पदां द्विपदां च सर्व-विध-व्याधि-परिहार-द्वारा अरोग-जीवन-अवाप्त्यर्थम्

- गवां समृद्ध-क्षीर-प्रदत्वार्थम्
- काले काले निकामं वृष्टि-प्राप्त्यर्थं, तद्-द्वारा धान्यानाम् अन्येषां च सप्रयोजनानां सस्यानां वृक्षाणां च अभिवृद्ध्यर्थम्
- जनानां परिसरस्य स्वच्छतया सुष्ठुतया परिपालने श्रद्धायाः उदयार्थम्
- तद्-द्वारा पञ्च-महाभूतानां प्रदूषण-परिहार-द्वारा पृथिव्याः ताप-शान्त्यर्थम्
- भगवतः गोपालस्य भगवतः वृषभध्वजस्य च अनुग्रहेण लोके सर्वत्र साधूनां परित्राणार्थं, दुष्कृतां च सद्बुद्धि-प्राप्त्यर्थं, धर्मस्य अभ्युत्थानार्थं जयार्थम्, अधर्मस्य ग्लान्यर्थं नाशार्थम्
- जनानां प्राणिषु परस्परं च सद्भावनार्थं, विश्वस्य कल्याणार्थं, गोमातुः जयार्थं
- जनानां सुख-शान्त-समृद्ध-जीवनार्थम्

सवत्स-गोमातृ-पूजां करिष्ये। तदङ्गं कलशपूजां च करिष्ये।
[कलशपूजां कृत्वा।]

## ॥ लघु-प्रयोगः ॥

विस्तृत-प्रयोगः (☞ पृ ८)

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च।
नमो ब्रह्म-सुताभ्यश्च पवित्राभ्यो नमो नमः॥

गवाम् अङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश।
यस्मात् तस्माच्छिवं मे स्यादिह लोके परत्र च॥

गोमातरं ध्यायामि। गोमातरम् आवाहयामि।
गोमात्रे नमः, आसनं समर्पयामि।
गोमात्रे नमः, पाद्यं समर्पयामि।
गोमात्रे नमः, अर्घ्यं समर्पयामि।
गोमात्रे नमः, आचमनीयं समर्पयामि।
गोमात्रे नमः, मधुपर्कं समर्पयामि।

गोमात्रे नमः, स्नपयामि। स्नानोत्तरम् आचमनीयं समर्पयामि।
गोमात्रे नमः, वस्त्रं समर्पयामि।
गोमात्रे नमः, यज्ञोपवीतं समर्पयामि।
गोमात्रे नमः, दिव्य-परिमल-गन्धान् धारयामि।
गन्धस्योपरि हरिद्रा-कुङ्कुमं समर्पयामि।
गोमात्रे नमः, अक्षतान् समर्पयामि। पुष्पैः पूजयामि।

## ॥ श्री-लक्ष्म्यष्टोत्तरशत-नामावलिः ॥

ॐ प्रकृत्यै नमः
ॐ विकृत्यै नमः
ॐ विद्यायै नमः
ॐ सर्व-भूत-हित-प्रदायै नमः
ॐ श्रद्धायै नमः
ॐ विभूत्यै नमः
ॐ सुरभ्यै नमः
ॐ परमात्मिकायै नमः
ॐ वाचे नमः
ॐ पद्मालयायै नमः १०
ॐ पद्मायै नमः
ॐ शुचये नमः
ॐ स्वाहायै नमः
ॐ स्वधायै नमः
ॐ सुधायै नमः
ॐ धन्यायै नमः
ॐ हिरण्मय्यै नमः
ॐ लक्ष्म्यै नमः
ॐ नित्य-पुष्टायै नमः
ॐ विभावर्यै नमः २०
ॐ अदित्यै नमः
ॐ दित्यै नमः
ॐ दीप्तायै नमः
ॐ वसुधायै नमः
ॐ वसु-धारिण्यै नमः
ॐ कमलायै नमः
ॐ कान्तायै नमः
ॐ कामायै नमः[1]
ॐ क्षीरोद-सम्भवायै नमः
ॐ अनुग्रह-प्रदायै नमः ३०
ॐ बुद्धये नमः
ॐ अनघायै नमः
ॐ हरि-वल्लभायै नमः
ॐ अशोकायै नमः
ॐ अमृतायै नमः
ॐ दीप्तायै नमः

[1]पाठान्तरम् - कामाक्ष्यै नमः, क्रोध-सम्भवायै नमः

ॐ लोक-शोक-विनाशिन्यै नमः
ॐ धर्म-निलयायै नमः
ॐ करुणायै नमः
ॐ लोक-मात्रे नमः ४०
ॐ पद्म-प्रियायै नमः
ॐ पद्म-हस्तायै नमः
ॐ पद्माक्ष्यै नमः
ॐ पद्म-सुन्दर्यै नमः
ॐ पद्मोद्भवायै नमः
ॐ पद्म-मुख्यै नमः
ॐ पद्मनाभ-प्रियायै नमः
ॐ रमायै नमः
ॐ पद्म-माला-धरायै नमः
ॐ देव्यै नमः ५०
ॐ पद्मिन्यै नमः
ॐ पद्म-गन्धिन्यै नमः
ॐ पुण्य-गन्धायै नमः
ॐ सुप्रसन्नायै नमः
ॐ प्रसादाभिमुख्यै नमः
ॐ प्रभायै नमः
ॐ चन्द्र-वदनायै नमः
ॐ चन्द्रायै नमः
ॐ चन्द्र-सहोदर्यै नमः
ॐ चतुर्भुजायै नमः ६०
ॐ चन्द्र-रूपायै नमः
ॐ इन्दिरायै नमः
ॐ इन्दु-शीतलायै नमः
ॐ आह्लाद-जनन्यै नमः
ॐ पुष्ट्यै नमः

ॐ शिवायै नमः
ॐ शिव-कर्यै नमः
ॐ सत्यै नमः
ॐ विमलायै नमः
ॐ विश्व-जनन्यै नमः ७०
ॐ तुष्ट्यै नमः
ॐ दारिद्र्य-नाशिन्यै नमः
ॐ प्रीति-पुष्करिण्यै नमः
ॐ शान्तायै नमः
ॐ शुक्ल-माल्याम्बरायै नमः
ॐ श्रियै नमः
ॐ भास्कर्यै नमः
ॐ बिल्व-निलयायै नमः
ॐ वरारोहायै नमः
ॐ यशस्विन्यै नमः ८०
ॐ वसुन्धरायै नमः
ॐ उदाराङ्गायै नमः
ॐ हरिण्यै नमः
ॐ हेम-मालिन्यै नमः
ॐ धन-धान्य-कर्यै नमः
ॐ सिद्ध्यै नमः
ॐ स्त्रैण-सौम्यायै नमः
ॐ शुभ-प्रदायै नमः
ॐ नृप-वेश्म-गतानन्दायै नमः
ॐ वर-लक्ष्म्यै नमः ९०
ॐ वसु-प्रदायै नमः
ॐ शुभायै नमः
ॐ हिरण्य-प्राकारायै नमः
ॐ समुद्र-तनयायै नमः

ॐ जयायै नमः
ॐ मङ्गलायै देव्यै नमः
ॐ विष्णु-वक्षः-स्थल-स्थितायै नमः
ॐ विष्णु-पत्न्यै नमः
ॐ प्रसन्नाक्ष्यै नमः
ॐ नारायण-समाश्रितायै नमः १००
ॐ दारिद्र्य-ध्वंसिन्यै नमः
ॐ देव्यै नमः
ॐ सर्वोपद्रव-हारिण्यै नमः
ॐ नव-दुर्गायै नमः
ॐ महा-काल्यै नमः
ॐ ब्रह्म-विष्णु-शिवात्मिकायै नमः
ॐ त्रि-काल-ज्ञान-सम्पन्नायै नमः
ॐ भुवनेश्वर्यै नमः १०८

॥ इति श्री-लक्ष्म्यष्टोत्तरशत-नामावलिः सम्पूर्णा ॥

गोमात्रे नमः, नाना-विध-परिमल-पत्र-पुष्पाणि समर्पयामि।
गोमात्रे नमः, धूपम् आघ्रापयामि।
गोमात्रे नमः, दीपं दर्शयामि।
गोमात्रे नमः, अमृतं महानैवेद्यं पानीयं च निवेदयामि। निवेदनानन्तरम् आचमनीयं समर्पयामि।
गोमात्रे नमः, कर्पूर-ताम्बूलं समर्पयामि।
गोमात्रे नमः, मङ्गल-नीराजनं दर्शयामि।
गोमात्रे नमः, प्रदक्षिण-नमस्कारान् समर्पयामि।

गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः।
गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम्॥

गावः स्वर्गस्य सोपानं गावो धन्याः सनातनाः।
सर्वे देवास्तनौ यस्याः सा धेनुर्वरदाऽस्तु मे॥

लक्ष्मीर्या लोक-पालानां धेनु-रूपेण संस्थिता।
घृतं वहति यज्ञार्थे मम पापं व्यपोहतु॥

गोमात्रे नमः, प्रार्थनाः समर्पयामि।

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्याऽऽत्मना वा प्रकृतेः स्वभावात्।
करोमि यद्यत् सकलं परस्मै
नारायणायेति समर्पयामि॥

**अनेन पूजनेन गोमाता प्रीयताम्।**

ॐ तत् सद् ब्रह्मार्पणमस्तु।

धर्म की जय हो! अधर्म का नाश हो! प्राणियों में सद्भावना हो! विश्व का कल्याण हो! गौ हत्या बन्द हो! गौ माता की जय हो!
(– पूज्य करपात्र स्वामी जी)

❀❀❀

# ॥ विस्तृत-प्रयोगः ॥

**ध्यानम्।**

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च।
नमो ब्रह्म-सुताभ्यश्च पवित्राभ्यो नमो नमः॥

गवाम् अङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश।
यस्मात् तस्माच्छिवं मे स्यादिह लोके परत्र च॥

गोमातरं ध्यायामि।

**आवाहनम्।**

आवाहयाम्यहं देवीं गां त्वां त्रैलोक्य-मातरम्।
यस्याः स्मरण-मात्रेण सर्व-पाप-प्रणाशनम्॥

त्वं देवी त्वं जगन्माता त्वमेवासि वसुन्धरा।
गायत्री त्वं च सावित्री गङ्गा त्वं च सरस्वती॥

आगच्छ देवि कल्याणि शुभां पूजां गृहाण च।
वत्सेन सहितां त्वां वै देवीमावाहयाम्यहम्॥

गोमातरम् आवाहयामि।

१. शृङ्गमूलयोः ब्रह्मविष्णुभ्यां नमः, ब्रह्मविष्णू आवाहयामि।
२. शृङ्गाग्रे सर्वतीर्थेभ्यो नमः, सर्वतीर्थानि आवाहयामि।
३. शिरोमध्ये महादेवाय नमः, महादेवम् आवाहयामि।
४. ललाटाग्रे गौर्यै नमः, गौरीम् आवाहयामि।
५. नासावंशे षण्मुखाय नमः, षण्मुखम् आवाहयामि।
६. नासापुटयोः कम्बलाश्वतराभ्यां नागाभ्यां नमः, कम्बलाश्वतरौ नागौ आवाहयामि।
७. कर्णयोः अश्विभ्यां नमः, अश्विनौ आवाहयामि।
८. नेत्रयोः शशिभास्कराभ्यां नमः, शशिभास्करौ आवाहयामि।
९. दन्तेषु वायुभ्यो नमः, वायून् आवाहयामि।
१०. जिह्वायां वरुणाय नमः, वरुणम् आवाहयामि।
११. हुङ्कारे सरस्वत्यै नमः, सरस्वतीम् आवाहयामि।
१२. गण्डयोः मासपक्षाभ्यां नमः, मासपक्षौ आवाहयामि।
१३. ओष्ठयोः सन्ध्या-द्वयाय नमः, सन्ध्याद्वयम् आवाहयामि।
१४. ग्रीवायाम् इन्द्राय नमः, इन्द्रम् आवाहयामि।
१५. कक्षदेशे रक्षोभ्यो नमः, रक्षांसि आवाहयामि।
१६. उरसि साध्येभ्यो नमः, साध्यान् आवाहयामि।
१७. जङ्घासु धर्माय नमः, धर्मम् आवाहयामि।
१८. खुराणां मध्येषु गन्धर्वेभ्यो नमः, गन्धर्वान् आवाहयामि।
१९. खुराणां पूर्वाग्रेषु पन्नगेभ्यो नमः, पन्नगान् आवाहयामि।
२०. खुराणां पश्चिमाग्रेषु अप्सरोभ्यो नमः, अप्सरस आवाहयामि।
२१. पृष्ठे एकादशरुद्रेभ्यो नमः, एकादशरुद्रान् आवाहयामि।
२२. सर्वसन्धिषु अष्टवसुभ्यो नमः, अष्टवसून् आवाहयामि।
२३. श्रोणीतटे पितृभ्यो नमः, पितॄन् आवाहयामि।
२४. पुच्छे सोमाय नमः, सोमम् आवाहयामि।
२५. अधोगात्रेषु द्वादशादित्येभ्यो नमः, द्वादशादित्यान् आवाहयामि।
२६. वालेषु सूर्यरश्मिभ्यो नमः, सूर्यरश्मीन् आवाहयामि।
२७. गोमूत्रे गङ्गायै नमः, गङ्गाम् आवाहयामि।
२८. गोमये यमुनायै नमः, यमुनाम् आवाहयामि।

२९. क्षीरे सरस्वत्यै नमः, सरस्वतीम् आवाहयामि।
३०. दधनि नर्मदायै नमः, नर्मदाम् आवाहयामि।
३१. घृते वह्नये नमः, वह्निम् आवाहयामि।
३२. रोमसु त्रयस्त्रिंशत्कोटिदेवेभ्यो नमः, त्रयस्त्रिंशत्कोटिदेवान् आवाहयामि।
३३. उदरे पृथिव्यै नमः, पृथिवीम् आवाहयामि।
३४. स्तनेषु चतुर्भ्यः सागरेभ्यो नमः, चतुरः सागरान् आवाहयामि।
३५. सर्वशरीरे कामधेनवे नमः, कामधेनुम् आवाहयामि।

नाना-रत्न-समायुक्तं कार्तस्वर-विभूषितम्।
आसनं ते मया दत्तं गृहाण जगदम्बिके॥

गोमात्रे नमः, आसनं समर्पयामि।

सौरभेयि सर्व-हिते पवित्रे पाप-नाशिनि।
गृहाण त्वं मया दत्तं पाद्यं त्रैलोक्य-वन्दिते॥

गोमात्रे नमः, पाद्यं समर्पयामि।

देहे स्थिताऽसि रुद्राणि शङ्करस्य सदा प्रिया।
धेनु-रूपेण सा देवी मम पापं व्यपोहतु॥

गोमात्रे नमः, अर्घ्यं समर्पयामि।

या लक्ष्मीः सर्व-भूतेषु या च देवेष्ववस्थिता।
धेनु-रूपेण सा देवी मम पापं व्यपोहतु॥

गोमात्रे नमः, आचमनीयं समर्पयामि।

सर्व-देव-मयि मातः सर्व-देव-नमस्कृते।
तोयमेतत् सुख-स्पर्शं स्नानार्थं गृह्ण[1] धेनुके॥

गोमात्रे नमः, स्नानं समर्पयामि। स्नानोत्तरम् आचमनीयं समर्पयामि।

आच्छादनं गवे दद्यां सम्यक् शुद्धं सुशोभनम्।
सुरभिर्वस्त्र-दानेन प्रीयतां परमेश्वरी॥

गोमात्रे नमः, वस्त्रं समर्पयामि।

---
[1]अयं शब्दप्रयोगः पौराणिकः अतः आर्षः इति भाति।

सर्व-देव-प्रियं देवि चन्दनं चन्द्र-सन्निभम्।
कस्तूरी-कुङ्कुमाढ्यं च सुगन्धं प्रतिगृह्यताम्॥

गोमात्रे नमः, दिव्य-परिमल-गन्धान् धारयामि। गन्धस्योपरि हरिद्रा-कुङ्कुमं समर्पयामि।

अक्षताश्च सुर-श्रेष्ठे कुङ्कुमाक्ताः सुशोभिताः।
मया निवेदिता भक्त्या गृहाण परमेश्वरि॥

गोमात्रे नमः, अक्षतान् समर्पयामि।
गोमात्रे नमः, शृङ्ग-भूषणं, कण्ठ-भूषणं, दोहन-पात्रम्, अन्यच्च यथा-शक्ति अलङ्कार-द्रव्यं समर्पयामि।

पुष्प-मालां तथा जाती-पाटली-चम्पकानि च।
पुष्पाणि गृह्ण धेनो त्वं सर्व-विघ्न-प्रणाशिनि॥

गोमात्रे नमः, पुष्प-मालां समर्पयामि।

## लक्ष्म्यष्टोत्तरशतनामावलिः (☞ पृ ५)

गोमात्रे नमः, नाना-विध-परिमल-पत्र-पुष्पाणि समर्पयामि।

देव-द्रुम-रसोद्भूतं गो-घृतेन समन्वितम्।
प्रयच्छामि महाभागे धूपोऽयं प्रतिगृह्यताम्॥

गोमात्रे नमः, धूपम् आघ्रापयामि।

आनन्द-दः सुराणां च लोकानां सर्वदा प्रियः।
गौस्त्वं पाहि जगन्मातः, दीपोऽयं प्रतिगृह्यताम्॥

गोमात्रे नमः, दीपं दर्शयामि।

सुरभिर्वैष्णवी माता नित्यं विष्णु-पदे स्थिता।
ग्रासं गृह्णातु सा धेनुर्याऽस्ति त्रैलोक्य-वासिनी॥

गोमात्रे नमः, नैवेद्यं निवेदयामि। गो-ग्रासं समर्पयामि। निवेदनानन्तरम् आचमनीयं समर्पयामि।

नीराजनं गृहाणेदं कर्पूरैः कलितं मया।
कामधेनु-समुद्भूते सर्वाभीष्ट-फल-प्रदे॥

गोमात्रे नमः, नीराजनं दर्शयामि।

गोभ्यो यज्ञाः प्रवर्तन्ते गोभ्यो देवाः समुत्थिताः।
गोभ्यो वेदाः समुत्कीर्णाः स-षडङ्ग-पद-क्रमाः॥

गोमात्रे नमः, पुष्पाञ्जलिं समर्पयामि।

यानि कानि च पापानि जन्मान्तर-कृतानि च।
तानि नाशय धेनो त्वं प्रदक्षिणपदे पदे॥

## ॥ प्रार्थना --- गोमती विद्या ॥

गावः सुरभयो नित्यं गावो गुग्गुलु-गन्धिकाः।
गावः प्रतिष्ठा भूतानां गावः स्वस्त्ययनं महत्॥५०॥

अन्नमेव परं गावो देवानां हविरुत्तमम्।
पावनं सर्व-भूतानां क्षरन्ति च वहन्ति च॥५१॥

हविषा मन्त्र-पूतेन तर्पयन्त्यमरान् दिवि।
ऋषीणाम् अग्निहोत्रेषु, गावो होमे प्रतिष्ठिताः॥५२॥

सर्वेषामेव भूतानां गावः शरणमुत्तमम्।
गावः पवित्रं परमं गावो मङ्गलमुत्तमम्।
गावः स्वर्गस्य सोपानं गावो धन्याः सनातनाः॥५३॥

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च।
नमो ब्रह्म-सुताभ्यश्च पवित्राभ्यो नमो नमः॥५४॥

ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा स्थितम्।
एकत्र मन्त्रास्तिष्ठन्ति हविरेकत्र तिष्ठति॥५५॥

देव-ब्राह्मण-गो-साधु-साध्वीभिः सकलं जगत्।
धार्यते वै सदा तस्मात् सर्वे पूज्यतमाः सदा॥५६॥

यत्र तीर्थे सदा गावः पिबन्ति तृषिता जलम्।
उत्तरन्ति पथा येन स्थिता तत्र सरस्वती॥५७॥

गवां हि तीर्थे वसतीह गङ्गा
पुष्टिस्तथा तद्-रजसि प्रवृद्धा।
लक्ष्मीः करीषे प्रणतौ च धर्मः
तासां प्रणामं सततं च कुर्यात्॥५८॥

॥इति श्रीविष्णुधर्मोत्तरे द्वितीयखण्डे मार्कण्डेयवज्रसंवादे गोमाहात्म्ये गोमतीविद्या नाम द्विचत्वारिंशत्तमोऽध्यायः॥

# ॥ अन्ये प्रार्थना-श्लोकाः ॥

गावो माम् उपतिष्ठन्तु हेम-शृङ्ग्यः पयोमुचः।
सुरभ्यः सौरभेय्यश्च सरितः सागरं यथा॥१॥

गा वै पश्यान्यहं नित्यं गावः पश्यन्तु मां सदा।
गावोऽस्माकं वयं तासां यतो गावस्ततो वयम्॥२॥

एवं रात्रौ दिवा वाऽपि समेषु विषमेषु च।
भयेषु च नरो नित्यं कीर्तयन् मुच्यते भयात्॥३॥

घृत-क्षीर-प्रदा गावो घृत-योन्यो घृतोद्भवाः।
घृत-नद्यो घृतावर्तास्ता मे सन्तु सदा गृहे॥४॥

घृतं मे हृदये नित्यं घृतं नाभ्यां प्रतिष्ठितम्।
घृतं मे सर्वतश्चैव घृतं मे मनसि स्थितम्॥५॥

गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः।
गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम्॥६॥

इत्याचम्य जपन् प्रातः सायं वा पुरुषस्तथा।
यद् रात्र्या कुरुते पापं तद् रात्र्या प्रतिमुच्यते।
यद् अह्ना कुरुते पापं तद् अह्ना प्रतिमुच्यते॥७॥

गोमात्रे नमः, प्रार्थनाः समर्पयामि।

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्याऽऽत्मना वा प्रकृतेः स्वभावात्।
करोमि यद्यत् सकलं परस्मै
नारायणायेति समर्पयामि॥

**अनेन पूजनेन गोमाता प्रीयताम्।**

ॐ तत् सद् ब्रह्मार्पणमस्तु।

धर्म की जय हो! अधर्म का नाश हो! प्राणियों में सद्भावना हो! विश्व का कल्याण हो! गौ हत्या बन्द हो! गौ माता की जय हो!
(– पूज्य करपात्र स्वामी जी)

❀❀❀

# ॥ अनुबन्धः ॥

**गोशरीरे यत्र यत्र या या देवता वर्तन्ते**
**इत्यत्र प्रमाणश्लोकाः हेमाद्रौ भविष्ये**

(अत्र वसूनां रुद्राणाम् अश्विनोश्च उक्तत्वात् अनुक्ताः “अधोगात्रेषु द्वादशादित्याः” अवशिष्ट-पूरणाय गीता-मुद्रणालय-प्रामाण्येन पूर्वत्र योजिताः।)

शृङ्गमूले गवां नित्यं ब्रह्मविष्णू समाश्रितौ।
शृङ्गाग्रे सर्वतीर्थानि स्थावराणि चराणि च॥ १॥

शिरोमध्ये महादेवः सर्वदेवमयः स्थितः।
ललाटाग्रे स्थिता गौरी नासावंशे च षण्मुखः॥२॥

कम्बलाश्वतरौ नागौ नासापुटमुपाश्रितौ।
कर्णयोरश्विनौ देवौ चक्षुषोः शशिभास्करौ॥३॥

दन्तेषु वायवः सर्वे जिह्वायां वरुणः स्थितः।
सरस्वती च हुङ्कारे मासपक्षौ च गण्डयोः॥४॥

सन्ध्याद्वयं तथौष्ठाभ्यां ग्रीवामिन्द्रः समाश्रितः।
रक्षांसि कक्षदेशे तु साध्याश्चोरसि संस्थिताः॥५॥

चतुष्पात् सकलो धर्मः स्वयं जङ्घासु संस्थितः।
खुरमध्ये तु गन्धर्वाः खुराग्रेषु च पन्नगाः॥६॥

खुराणां पश्चिमाग्रेषु गणा ह्यप्सरसां स्थिताः।
रुद्राश्चैकादश पृष्ठे वसवः सर्वसन्धिषु॥७॥

श्रोणीतटस्थाः पितरः सोमो लाङ्गूलमाश्रितः।
आदित्यरश्मयो वालाः पिण्डीभूता व्यवस्थिताः॥८॥

साक्षाद् गङ्गा च गोमूत्रे गोमये यमुना स्थिता।
क्षीरे सरस्वती देवी नर्मदा दध्नि संस्थिता॥९॥

हुताशनः स्वयं सर्पिर्ब्राह्मणानां गुरुः परः।
[अष्टाविंशति?]त्रयस्त्रिंशत् तु देवानां कोट्यो रोमसु संस्थिताः॥१०॥

उदरे पृथिवी ज्ञेया सशैलवनकानना।
चत्वारः सागराः पूर्णा गवां ये तु पयोधराः॥११॥

एतद् वः कथितं सर्वं यथा गोषु प्रतिष्ठितम्।
जगद् वै देवशार्दूल सदेवासुरमानवम्॥१२॥

❀❀❀

## Jagadguru Shri Shankara Bhagavatpadacharya Paramparagata Shri Kanchi Kamakoti Mulamnaya Sarvajnapithadipati Jagadguru Shri Jayendra Saraswati Shankaracharya Swamigal's Ajna regarding Go Samrakshanam



- **"गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश"** - All the worlds are in the body of a cow. Hence circumambulating a cow yields the benefit of circumambulating the entire world.
- Children of all religions in this world drink a cow's milk after they are weaned from their mother's milk.
- Thus the person who eats a cow's flesh attains the sin equal to that of eating the flesh of one's own mother.
- Killing a cow is stated in the shastra as one among the great sins.
- Just as it is our duty to do seva to our elderly mother, likewise it is the infallible duty of those of every religion to to protect cows that no longer yield milk and serve them.
- A handful of grass and a small amount of money has to be set aside daily in every household. This is to be used to feed the cows in one's neighbourhood and to help rescue the cows that are taken for slaughter. If the

animals are protected in this manner we get the punya of protecting our own mother.

- All the devatas reside in a cow's body. Lakshmi especially resides in the rear portion of a cow. Worshipping a cow is equivalent to worshipping Lakshmi and all devatas. Lakshmi is pleased by this.
- Prosperity is essential for people of all religions. Hence to attain growth and prosperity people of all religions must worship cows.
- Everything that is obtained from a cow is sacred. We call the mixture of milk, curd, ghee, cow dung and cow urine as Panchagavya. There is no other way to remove the great sins other than consumption of Panchagavya.
- For removing the pāpa that resides in our bones and skin and manifests as diseases, panchagavya is the sure medicine like the arrow of Rama (is sure to strike its target).
- If we give quality items to cows to feed and drink, then this medicine will be all the more effective.
- The ancestor of Bhagavan Shrirama, King Dilipa, was disappointed in all quarters, and finally did seva to Gomātā and attain a gem of a son like Raghu Maharaj.

## Gomātā - Our mother

From the time a child is born, it drinks its mother's milk. After being weaned, we give only cow's milk to the infant and not that of any other animal. Hence the mother who gives life to us is our birth mother and the gomata is our second mother. Hence we must love Gomātā in the same manner as we love our birth mother.

## Gomātā - Mother Lakshmi

Devatas reside in every part of cows. Even for the highest devatas, we do not worship their behind. But Lakshmi resides in the rear side of a Cow. Due to this reason we worship the rear side of a cow.

## Everyone must protect Gomātā

As long as people keep protecting the cows, they will gain the anugraha of Lakshmi. Who is there in this world who does not desire the grace of Lakshmi? Hence whoever wishes for the grace of Lakshmi should definitely protect Gomātā.

## The ill effects of slaughtering cows

Slaughter of Gomātā is equivalent to slaughter of Mother Lakshmi. When Mother Lakshmi is slaughtered, it leads to financial instability and loss of wealth in the home and the country.

When there is loss of wealth, discontent spreads everywhere and results in increased sufferings. What else would cause humans greater difficulty than this? Hence to keep the nation happy, peaceful and satisfied, we should stop the slaughter of cows.

## Stop eating the flesh of cows

The growth of a living human's body should not need the flesh of a living animal. Definitely one should not eat the flesh of the Gomātā who helps us by giving milk, ghee and curds and also manure for our fields and benefits us in every manner.

Understanding that eating cow's flesh is like eating the flesh of one's own mother, one should give up eating of cow's flesh.

## Eating of Panchagavya removes great sins

It is our sins that are the cause for the diseases and difficulties in our life. Among these are the five mahapatakas. There is no [easy] prayaschitta for the removal of such pāpas.

The mixture of milk, curd, ghee, urine and dung of a cow is together called Panchagavya. The consumption of this Panchagavya is the parihara for even the abovementioned mahapapa-s.

Hence for removal of all pāpas we should protect the Gomātā!

**Source:** Shri Jayendra Saraswati Shankaracharya Swamigal's Ajna regarding Go Samrakshanam (Hindi), Mehta Charitable Trust, New Delhi

❁